International Journal of Multidisciplinary Research and Development 2015; 2(2): 127-129

International Journal of Multidisciplinary Research and Development

IJMRD 2015; 2(2): 127-129
www.allsubjectjournal.com
Received: 13-01-2015
Accepted: 02-02-2015
E-ISSN: 2349-4182
P-ISSN: 2349-5979
Impact factor: 3.762

डॉ. छगन लाल शर्मा
नई देल्ही, भारत

Correspondence:
डॉ. छगन लाल शर्मा
नई देल्ही, भारत

# वैयाकरणशिरोमणिः श्रीहरिरामकाले तस्य काशिका च

**डॉ. छगन लाल शर्मा**

अतिरोहितमेव प्रेक्षावतां व्याकरणशास्त्ररीत्या शाब्दप्रक्रियाप्रतिपादकस्य वैयाकरणभूषणसाराख्यग्रन्थरत्नस्य महत्त्वम्। ग्रन्थोऽयमत्यन्तं दुरूहः इति हेतोः अस्य भावावगमनाय नैकाः व्याख्याः विरचिताः विद्वद्भिः। तासु च व्याख्यासु सप्तदशोत्तरद्विशतवर्षेभ्यः (217 वर्षेभ्यः) प्राक् महावैयाकरणः 'काले' इत्युपनामकः श्रीहरिरामशास्त्री 'काशिका' इति भूषणसारस्य व्याख्याग्रन्थरत्नं रचयामास। नैकशास्त्रपारगोऽयं विद्वान् न केवलं व्याकरणशास्त्रे एव ग्रन्थरचनाश्चकार अपितु धर्मशास्त्रादिष्वपि। एन.सी.सी. (छमू ब्जंसवहने ब्जंसवहवतनउ; छब्ब्द्ध टवसण ट) द्वारा विज्ञायते यत् एतेन महानुभावेन एकान्नविंशतिः ग्रन्थाः विरचिताः आसन्।

**ते च ग्रन्थाः–**

| | | |
|---|---|---|
| 1. अत्रिस्मृति टीका | 2. आह्निकसारः | 3. गंगामाहात्म्यम् |
| 4. तद्धितचन्द्रिका | 5. परिभाषाटीका | 6. परिभाषाभास्करटीका |
| 7. परिभाषोन्दुशेखरटीका | 8. परिशिष्टप्रकाशटीका | 9. प्रायश्चित्तसारः |
| 10. बुधस्मृतिटीका | 11. भैरवीसपर्याटीका | 12. मलमासतत्त्वटीका |
| 13. महाभाष्यप्रदीपटीका | 14. वैयाकरणसिद्धान्तमंजूषाटीका | 15. व्यवहारप्रकाशः |
| 16. शब्देन्दुशेखरटीका | 17. श्राद्धवर्णनम् | 18. षट्कर्मविवेकः |

काशिकेति व्याख्यायाः संयोजनेने एकान्नविंशतिः ग्रन्थाः संजायन्ते।

**श्रीहरिरामशास्त्रिणः वंशपरिचयः–**
श्रीहरिरामशास्त्री स्वपरिचयं स्वविरचितकाशिकाख्ये ग्रन्थे अन्तिमश्लोकैः प्रादात्। ते चे श्लोकाः– (भूषणसारः दर्पणकशिकायुतः पृ. सं. 592)

**योऽभूत्पण्डितमण्डलीपरिणतः श्रोताब्धिसारज्ञताम्,**
**आप्तो वेदविदां वरः परिवृढैर्भूमेः सदा वन्दितः।**
**श्रीमद्भैरवशंकरीपदरजः सेवाप्तपूर्णार्थकाः,**
**श्रीमत्केशवदीक्षितः समभवत्तस्यात्मजोऽभूद्धरिः।।**
**रामान्तः शिवपालिते शिवपुरे श्रीकाशिशब्दाभिधे,**
**तेनेयं खलु निर्मिता कृतिवरा श्रीभूषणे काशिका।।**
**श्रीमद्भैरवपादसेवनवपुः श्रीकण्ठपादेऽर्पिता,**
**मोदं सन्तनुतां सदाप्तविदुषां सद्युक्तिभाजां चिरम्।।**
**धनराजानुजः श्रीमान् सखीदेव्यास्तु गर्भजः।**
**व्याख्यांचक्रे भूषणस्य यथामति शिवाप्तये।।**
**युगभूतदिगीशात्मसंमिते वत्सरे गते।**
**मार्गशीर्ष शुक्लपक्षे पौर्णमास्यां विधोर्दिने।।**
**रोहिणीस्थे चन्द्रमसि वृश्चिकस्थे दिवाकरे।**
**समाप्तिमगमद् ग्रन्थस्तेन तुष्यतु नः शिवः।।**

अर्थात् हरिरामस्य पितुः नाम केशवदीक्षितः मातुः नाम सखीदेवी, अग्रजस्य नाम धनराजः आसीत्। काश्यां विक्रमशके 1854 वर्षे मार्गशीर्षशुक्लपक्षपौर्णमास्यां सोमवासरे, रोहिणीनक्षत्रे वृश्चिकगते रवौ इमां टीकां समापयत्। संवत्सराणां पाश्चात्यगणनानुसारं 4–12–1797 तमे वर्षे ग्रन्थोऽयं सम्पन्नः। अतः हरिरामस्य कालः अष्टादशशतकान्तिमभागः एकोनविंशशतकपूर्वभागश्च आसीत् इति निश्चीयते। (भू. सा. तत्त्वप्रकाशिका, भूमिका, पृ. 27)

**हरिरामशास्त्रिणः काशिकाव्याख्यानम् :–**
काशिका' इति नाम श्रवणानन्तरं झटिति मनसि भारतीसमुपासकानां वामनजयदित्याभ्यां विरचितः ग्रन्थविशेषः आयाति। वस्तुतः अयं हरिरामशास्त्रिविरचितकाशिकाग्रन्थः पाणिनिसूत्राणां व्याख्यां न विदुधाति। अयन्तु अत्यन्तदुरूहस्य श्रीकोण्डभट्ट– ('कोण्डभट्टः इत्येवास्य महानुभावस्य नाम न तु कौण्डभट्टः' इति तथ्यस्य सिद्धिः मया 'कोण्डभट्टः' इति शोधपत्रेऽनेकैः प्रमाणैः कृता वर्तते)– विरचित वैयाकरणभूषणसारस्य व्याख्यात्मकः ग्रन्थः। काशयति प्रकाशयति अर्थम् इति स्वनामधन्येय व्याख्या काशिकेति। यद्यपि अस्मात् काशिकाग्रन्थात् प्राक् रत्नप्रभा–दर्पण–कान्ति–व्याख्याग्रन्थाः (भूषणसारस्य) विनिर्मिताः आसन् किन्तु अस्य व्याख्या–ग्रन्थस्येदं वैशिष्ट्यं यत् एतस्मिन् व्याख्याने मूलार्थः अतिसमीचीनया पद्धत्या अवतरणिकादिभिः प्रकाशितः। अतः अस्य ग्रन्थस्य स्वरूपमपि अतिविपुलं दृश्यते। अतिविपुलोऽपि अयं ग्रन्थः दर्पणापेक्षया सुलभः।उपलभ्यमानासु प्राचीनव्याख्यासु व्याख्येयमेकैव मूलकृत्तात्पर्यवर्णनसमर्था अस्ति। अस्यां काशिकाव्याख्यायां भूषण–कृन्मतप्रदर्शनात् परं नव्यमतमपि प्रदर्शितम् अस्ति। आधुनिकव्याख्याकाराः प्रभाकारः श्रीबालकृष्णपंचोली,

शांकरीकारः श्रीशंकरशास्त्री, तत्त्वदर्शिनीकारः श्री पेरिसूर्यनारायणशास्त्री, सरलाकारः श्री गोपालशास्त्री च बहुशः काशिकाकारेण प्रभाविताः दृश्यन्ते। प्रमाणार्थं कानिचन स्थलानि प्रदर्श्यन्ते–

**काशिकाकारस्य प्रभाकारोपरि प्रभावः–**

वैयाकरणभूषणसारस्य आधुनिकव्याख्याकारेषु काशिकाकारेण प्रमुखतया प्रभावितः प्रभाकरः श्रीबालकृष्णपंचोली दृश्यते। एतस्य प्रमाणानि प्रस्तूयन्ते–

1. मंगलश्लोकव्याख्यान – समये 'श्रीलक्ष्मीरमणम्' इति शब्दस्य व्युत्पत्तिः यथा श्रीहरिरामशास्त्रिभिः (भू. सा. (द. का.) पृ. 2) प्रदर्शिता तथाऽयमपि प्रदर्शयति यद्यपि प्रभाकारः (भू. सा. (प्र. द.) पृ. 1) 'श्रीलक्ष्मीरणम्' इति शब्दस्य बहुधा व्यत्पत्तीः प्रादर्शयत् अथापि तासु काशिकाकृत्प्रोक्ताऽपि वर्तत इति एतेन प्रभाकारः काशिकाकारेण प्रभावितोऽस्ति इति वक्तुं शक्यते। (प्रभाव्याख्या मंगलश्लोकः)
2. 'स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते' इत्यत्र काशिकाकारेण स्फोटरूपमिति जगतः परब्रह्मणश्च इति द्वयोरपि विशेषणम् इति उक्तम्। प्रभाकारेण अपि एतस्यैव अनुकरणं कृतं वर्तते। प्रभाकारस्य वचांसि यथा – स्फोटरूपमित्यादिना। इति प्रतीकमादाय एतच्च भगवतो जगतश्च विशेषणम् इत्युक्तम्। (भू. सा. (प्र. द.) पृ. 3)
3. **वाग्देवी यस्य जिह्वाग्रे वरीवर्ति सदा मुदा।**
   **भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये।।**

इत्ययं श्लोकः सर्वैरपि व्याख्यातृभिः न व्याख्यातः। काशिकाकारेण तु व्याख्यातो वर्तत इति हेतोः प्रभाकारः तस्यैव वचसाम् उल्लेखं करोति – 'अत्रैतादृशविलक्षणसामर्थ्योपन्यासेन दीक्षितस्य देवांशत्वसूचनद्वारा तदीयस्तुतेरभीप्सितार्थसाधकत्वं समुचितत्वं च सूचितमिति काशिका।

4. काशिकाकारेण अभिधाशब्दः व्यापारपरः तत्पर्यायरूपः इति व्याख्यातम् अस्ति। अभिदधाति फलं जनयति, अभिधीयते साध्यत्वेन धातुना इति वा अभिधेति व्युत्पत्तिद्वयं प्रदर्शितम्। तत्र प्रथमव्युत्पत्तौ 'आतश्चोपसर्गे' (पा. सू. 3/1/36) इति कर्तरि कः। द्वितीयव्युत्पत्तौ 'आतश्चोपसर्गे' (पा. सू. 3/3/106) इति कर्मणि अङ्। तथा च भावना अभिधा इत्यपरनामिका, साध्यत्वेन अभिधीयमाना क्रिया व्यापार इति व्याख्यातम्। प्रभाकारेणापि एवं व्युत्पत्तिः प्रदर्शिता। प्रभाकारस्य वचांसि इत्थम्– 'भावनेति उत्पत्त्यर्थकभवतेर्ण्यन्ताद् भावे युचि भावनेति सिद्धम्। अभिदधाति = फलं जनयति साध्यत्वेन अभिधीयते इति वा अभिधा। आद्ये 'आतश्चोपसर्गे' इति कर्तरि कः। अन्त्ये तादृशानुपूर्वीमता सूत्रान्तरेण कर्मणि अङ्। तथा च भावना = अभिधानामिका साध्यतवेन अभिधीयमाना क्रिया = व्यापार इत्यर्थ इति काशिका इति। (भू. सा. (प्र. द.) पृ. 6)

वैयाकरणभूषणसारे पंचम्याः कारिकायाः व्याख्यानावसरे 'जानातिकरोत्यादेः केवलज्ञानयत्नादिक्रियामात्रवाचित्वं दूषयति कृञ् इति अयं भावः। इत्यस्मिन् प्रसंगे यथा काशिकाकारेण (भू. सा. (द. का.) पृ. 74) व्याख्यातं तस्यैव अनुकरणं प्रभाकारेण (भू. सा. (प्र. द.) पृ. 62) कृतं वर्तते।

**काशिकाकारस्य शांकरीकारोपरि प्रभावः–**

भारद्वाजकुलोत्पन्नः (शांकरीव्याख्यारम्भश्लोकः पृ. 1) श्रीशंकरशास्त्री अपि काशिकाकारे बहु आदरं प्रदर्शयति। शांकरी तु काशिकाम् उपजीव्यैव रचितेत्यपि वक्तुं शक्यते। एतच्च तस्य व्याख्यानस्य एतेन अंशेन विज्ञातुं शक्यते–

'महामहोपाध्यायहरिशास्त्रिकृतकाशिकाख्यटीकायां तद्भाष्यविरोधेति प्रतीकस्य धृतत्वात्तदुपात्तवैयाकरणभूषणसारपुस्तके तादृश एव पाठ आसीदित्यनुमीयते इत्यलम्'। इत्येताभिः पंक्तिभिः एतत्तु सामान्यधिया अपि विज्ञातुं शक्यते यत् श्रीशंकरशास्त्री श्रीहरिरामशास्त्रिणं प्रामाणिकपुरुषत्वेन अंगीकुरुते, महान्तं समादरं च तस्य करोतीति। काशिकाकारस्य प्रभावः शंकरशास्त्रिणः उपरि बहुत्र द्रष्टुं शक्यते। तद्यथा–

1. **'श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।**
   **स्फोटरूपं यतस्सर्वं जगदेतद् विवर्तते।।'**

(भू. सा. मंगलश्लोकः (द. का.) पृ. 1)

इति भूषणसारमंगलश्लोकविवरणसमये श्रीशंकरशास्त्री 'यतः' इति पदस्य व्याख्यानं तथैव करोति यथा काशिकाकारः श्रीहरिरामशास्त्री।

तदित्थम् – प्रप्रथमतया काशिकाकारव्याख्यानं पश्यामः। (भू. सा. (द. का.) पृ. 2)

गौरी = पार्वती, सा च कालिका, – 'तस्यां विनिर्गतायां तु कृष्णाभूत् सापि पार्वती। कालिकेति समाख्याता' – इति मार्कण्डेयपुराणात्, 'उमा कात्यायनी गौरी काली' इति कोशाच्च। इत्थं च महाकाल्यादित्रयस्यापि स्तुतिः कृता भवति। तस्याः रमणः शिवः तस्य रूपं तदस्यास्तीत्यर्थः। गौरीरमणेन रूपयति तदभिन्नतया गृह्णति इति वार्थः। कर्मकर्तरिणिनिः। गौरीरमणं स्वाभिन्नतया रूपयति ग्राहयति इति वार्थः। पूर्वकल्पे तद्धित इनिः उत्तरपक्षे 'सुप्यजातौ' (पा. सू. 3/2/78) – इतिणिनिः–

सः कः? एतद् दृश्यमानं सर्वं जगत् यतः यस्य। आद्यादित्वात्तसिः। विवर्त्तते = विषयसत्ताकं भवति, अतात्त्विकान्यथाभावाश्रयो भवतीति वार्थः। तदुक्तम् – 'तात्त्विकोऽन्यथाभावः परिणामः अतात्त्विकोऽन्यथाभावो विवर्तः' इति। अन्यथाभावश्च भ्रम एव। तदाश्रयत्वं तु विषयतया जगति बोध्यम्। एतेन जगतो विवर्ताधिष्ठानत्वरूपं सर्वजगदुपादानत्वकारणत्वम् उक्तम्, तेन सर्वोत्कृष्टतया स्तुत्यर्हत्वमावेदितम्। (भू. सा. (द. का.) पृ. 3)

आधुना शांकरीव्याख्यानं पश्यामः तत्र हि – 'वाच्यवाचका (नामरूपा) त्मकमेतत्परिदृश्यमानं सर्वं जगद्यतो विवर्तते, यत इति आद्यादित्वात् षष्ठ्यर्थे तसिः यस्य विवर्तो भवति तं लक्ष्मीरमणमिति सम्बन्धः। यस्य कस्यचिदेकस्य नामरूपात्मकस्य वस्तुनः उत्पत्तेः अन्यस्मात्पामरादपि संभवादित्युक्तं सर्वमिति। विवर्तो नाम अतात्त्विकोऽन्यथाभावः। स च पूर्वरूपपरित्यागेनासत्यनानाकार–प्रतिभासः। यथा शुक्तिकायां रजतस्य रज्ज्वां वा सर्पस्य प्रतीतिः। अत्र शुक्ती रज्जुर्वा स्वस्वरूपमपरित्यज्यैव अन्यरूपेण रजतरूपेण सर्परूपेण वा प्रतिभासते। यत्र यदधिष्ठानं स्वयमविकृतं सदेवान्यथा भवति स विवर्त इति भावः। तात्त्विकोऽन्यथाभावः परिणामः। पूर्वरूपपरित्यागेनान्यथाभवनम्। यत्र यदधिष्ठानं स्वयं विकृतं सदेव अन्यथा भवति स परिणाम इत्यर्थः। यथा दुग्धस्य दध्यात्मना परिणामः। अत्र दुग्धं स्वयं विकृतं सदेव पूर्वरूपं परित्यज्यैव अन्यथा भवति दध्यात्मना परिणमते। एतेन भगवतो लक्ष्मीरमणस्य विवर्ताधिष्ठानत्वरूपं सर्वजगन्निदानत्वम् उक्तम्। तेन सर्वोत्कृष्टतया स्तुत्यर्हत्वमावेदितम्। स्फोटस्य वैयाकरणोपास्यत्वेन समुचितेष्टदेवतायाः स्तुतिरूपं मंगलं च सूचितमिति।

काशिकाकारवचांसि (भू. सा. (द. का.) पृ. 4) इत्थम् – 'जगतो विशेषणं स्फोटरूपं स्फुटत्यस्मादिति स्फोटः स च सिद्धान्ते ब्रह्मस्वरूपः इति स्पष्टं हर्यादिग्रन्थे। तद्रूपं तदभिन्नमित्यर्थः। 'सर्वं खलु इदं ब्रह्म' इत्यादि श्रुतिसिद्धो ब्रह्माभेदः। लक्ष्मीरमणविशेषणं वैतत् स्फोटस्य वैयाकरणोपास्यत्वेन समुचितदेवतास्तुतिसंपत्यर्थं तदुपादनम्।

भूषणसारस्य मंगलश्लोकव्याख्यानसमये काशिकाकारेण (भू. सा. (शांकरी) पृ. 2) 'स्फोटरूपमिति' जगतः परब्रह्ममणश्च द्वयोरपि विशेषणम् इत्युक्तम्। तत्र हि– स्फोटरूपमिति। लक्ष्मीरमणविशेषणमेतत्। स्फुटति प्रकाशतेऽर्थो यस्मादिति व्युत्पत्त्या सकलार्थप्रकाशकं तत्त्वं स्फोटः। तच्च तत्त्वं वेदान्तेषु वर्ण्यमानं सकलजगन्निदानं मायाशबलितं ब्रह्मैवेति स्फोटो ब्रह्मेत्यर्थः। तद्रूपं तत्स्वरूपं सकलजगन्निदानभूतब्रह्माभिन्नमिति यावत्। एतादृशं लक्ष्मीरमणमित्यर्थः। जगतो विशेषणं वा। अस्मिन् पक्षे स्फुटति व्यक्तीभवति घटपटाद्यर्थो यस्मादिति स्फोटो वाचकः शब्दः इति।

2. काशिकाकारेण अभिधाशब्दव्याख्यानसमये 'अभिधा' शब्दोऽपि व्यापारपरः तत्पर्यायरूपः इति व्याख्यातम्। अभिदधाति फलं जनयति अभिधीयते साध्यत्वेन धातुना इति वा अभिधेति व्युत्पत्तिद्वयं प्रदर्शितम्। तत्र प्रथमव्युत्पत्तौ 'आतश्चोपसर्गे' (पा. सू. 3.1.36) इति कर्तरि कः। द्वितीयव्युत्पत्तौ 'आतश्चोपसर्गे' (पा. सू. 3.3.100) इति कर्मणि अङ्। तथा च भावना, अभिधा इत्यपरनामिका साध्यत्वेनाभिधीयमाना क्रिया व्यापार इति व्याख्यातम् इति।

शांकरीकारेणापि उपर्युक्तादिभिरेव पंक्तिभिः व्युत्पत्तिः प्रदर्शिता अभिधाशब्दस्य। (भू. सा. शांकरी 'व्यापारस्तु भावनाभिधः' इति प्रसंगे पृ. 12)

3. अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात् तत्र लकारविधिः स्यादिति चेत् तर्हि कृतामपि कर्तृवाचित्वं न सिद्ध्येत्। 'कर्तरि कृत्' (पा. स. 3/4/67) इति च 'लः कर्मणि' (पा. सू. 3/4/69) इति अनेन तुल्ययोगक्षेमम्। अस्य मूलस्य 'तुल्ययोगक्षेम' शब्दस्य व्याख्यानं काशिकाकारेण यथा कृतमस्ति शंकरशास्त्रिणा अपि तथैव तस्य अनुवादः कृतोऽस्ति। काशिकाकारस्तावत्–

तुल्यो योगक्षेमोऽर्थप्रतिपादकता यस्येत्यर्थः। अयं भावः – यदि लाघवमात्रपक्षपातेन 'लः कर्मणि' (पा. सू. 3/4/69) इति सूत्रस्थकर्मादिपदस्य धर्मपरत्वांगीकारस्तर्हि तत्रापि तथैव स्वीकारः उचितो वैषम्ये बीजाभावात्। शंकरशास्त्रिभिरपि एतदेव अनूदितम्। (भू सा. शांकरी – अयं दर्शनान्तरीयरीत्येति प्रसंगे पृ. 24)

4. **निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।**
   **न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः।।**

(भू. सा. सप्तमी कारिका (द. का.), पृ. 88)

इति करिकायाः व्याख्यानावसरे काशिकायां 'तण्डुलानोदनं पचति' इत्यत्र तण्डुलानां विकार्यकर्मत्वं ओदनस्य निर्वत्यकर्मत्वम् अभिमतम्, तन्निर्वाहार्थम् उत्पत्ति–विक्लित्तिरूफलद्वयार्थकत्वपर एव स भाष्यग्रन्थः। एकस्यैव व्यापारस्य उक्तफलद्वयजनकतया व्यापारद्वयपरत्वे असंगतिः स्पष्टैवेति भावः इति भूषणोक्तमेवोल्लिखितम्। अत्र शांकर्यपि काशिकानुसारिणी।

**काशिकाकारस्य तत्त्वदर्शिनीकार–सरलाकारयोरूपरि प्रभावः –**

सरलाकारः तत्त्वदर्शिनीकारश्च उभावपि बहुत्र काशिकाकारस्यानुसरणं कुरूतः। एतयोरनुसरणस्य एकैकमुदाहरणं प्रदर्श्यते। लकारार्थनिर्णये–

**परतो भिद्यते सर्वमात्मा तु न विकम्पते।**
**पर्वतादिस्थितिस्तस्मात्पररूपेण भिद्यते।।**

इति वाक्यपदीयकारिकायाः व्याख्यानावसरे काशिकाकारेण यथा व्याख्यानं कृतं विद्यते। तस्यैव अनुसरणं सरलाकारेण कृतमस्ति।

तदित्थम्– काशिकाकारः 'सर्वं स्वात्मसत्तादिकं सर्वं परतः भिद्यते भेदे स्वावधिकं स्वातिरिक्तमेव। आत्मा तु स्वस्वरूपं तु न विकम्पते स्वतोऽभेदवान् भवति इति व्याख्यात्।

अधुना पश्यामः सरलाकारस्य वचांसि परतो भिद्यते इति। सर्वं स्वात्मसत्तादिकं सर्वम्। परतो भिद्यते परत एव भिद्यते। भेदे स्वावधिकं स्वातिरिक्तमेव। आत्मा तु स्वस्वरूपं तु। न विकम्पते स्वतोऽभेदवान् भवति इत्यर्थः।

**यापारो भावना सैवोत्पादना सैव च क्रिया।**
**कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थः इष्यते।।**

(भू. सा. पंचमी कारिका (द. का.) पृ. 73)

इति धात्वर्थप्रकरणस्थकारिकायाः मुख्यम् उद्देश्यं काशिकाकारः 'एतेन व्यापारो भावनेति कारिकायाः व्यापारस्य धातुवाच्यत्वसाधनेऽपि फलांशस्य तदसाधनेन न्यूनतेति दूषणं प्रत्युक्तम् इति कथयति। तत्त्वदर्शिनीकारेण (भू. सा. (तत्त्वदर्शिनी) पृ. 130) अयमेवाशयः प्रदर्शितः।

काशिकाव्याख्यायामस्यां शाब्दिकमर्यादया बहूनां वाक्यानां प्रामाणिकतत्तद्ग्रन्थानुरोधेन नवयनैयायिकसरण्या शाब्दबोधो वर्णितः। इयं च व्याख्या एकैव हरिरामभट्टस्य न्यायव्याकरणदिशास्त्रेषु निरतिशयं पाण्डित्यमभिव्यनक्ति इति।

**उपयुक्त–सन्दर्भ–ग्रन्थ–सूची**


1. भूषणसारतत्त्वप्रकाशिका–(भू. सा. तत्त्वप्रकाशिका) महामहोपाध्यायः आचार्यः के. वि. रामकृष्णमाचार्यः, राष्ट्रिय–संस्कृतविद्यापीठम्, तिरुपतिः 2010
2. भूषणसारसमीक्षा–आचार्यः के. वि. रामकृष्णमाचार्यः, राघवप्रकाशनम् तिरुपतिः, 1996
3. नरसिंहप्रिया–वैयाकरणभूषणसाख्याख्या नामार्थनिर्णयान्ता–महामहोपाध्यायः आचार्य के. वि. रामकृष्णचार्यः, प्रकाशनाय सिद्धा।
4. वैयाकरणभूषणनिबन्धसंग्रहः–(वै. भू. नि. स.) चौखम्भा, 1939
5. वैयाकरणभूषणसारः–काशिकाव्याख्या (भू. सा. का.) मुम्बई, 1915
6. वैयाकरणभूषणसारः–दर्पणकाशिकायुतः (भू. सा. द. का.) मुम्बई, 1915
7. वैयाकरणभूषणसारः–दर्पणपरीक्षायुतः (वैःभू.द.प.) हरिदाससंस्कृतग्रन्थमाला 133, चौखम्भा. वाराणसी, 1939
8. वैयाकरणभूषणसारः–प्रभादर्पणयुतः (भू.सा.प्र.द.) आदर्शग्रन्थमाला 2, वाराणसी, 1967
9. वैयाकरणभूषणसारः–तत्त्वदर्शिनीव्याख्यायुतः (भू. सा. तत्त्व) विजयनगरम् (आ. प्र.), 1967
10. वैयाकरणभूषणसारः–शांकरी (भू.सा.शां.) आनन्दाश्रमसंस्कृत–ग्रन्थावलिः 135, पूना 1967
11. वैयाकरणभूषणसारः–सरलासुबोधिनीयुतः (भू.सा.स.सु.) हरि–कृष्णनिबन्धमणिमाला 7, वाराणसी, 1952
12. वैयाकरणभूषणसारः–भैमीभाष्योपेतः (भैमी) देहली, 1969
13. वैयाकरणभूषणसारः–कुमारीसुदेशगिरिव्याख्या, देहली, 1969
14. वैयाकरणसिद्धान्तभूषणम्–(वै. सि. भू.) काशीसंस्कृतग्रन्थमाला, 1900
15. संस्कृत व्याकरण शास्त्र का इतिहास, भागद्वयम् (सं.व्या.शा.इ.) युधिष्ठिर–मीमांसकः
16. सिद्धान्तकौमुदी तत्त्वबोधिन्या सह (सि.कौ.त.) निर्णयसागरप्रकाशनम्, मुम्बई, 1936
17. सिद्धान्तकौमुदी, बालमनोरमा तत्त्वबोधिनीयुता (सि.कौ.बा.त.) मोतीलाल बनारसी दास, देहली, 1964
18. छमू ब्ंजंसवहने ब्ंजंसवहनतनउ टवसण ट
19. Trends in Linguistics – Panini- A survey of research, George Cardona, Paris 1976